# Vishnukritam 1 Shiva Stotram

# વિષ્ણુકૃતં ૧ શિવસ્તોત્રમ્

## Document Information

Text title : Vishnukritam 1 Shiva Stotram

File name : viShNukRRitaM1shivastotram.itx

Category : shiva, bRRihannAradIyapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 79/322-328||

Latest update : November 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 29, 2025

*sanskritdocuments.org*

# વિષ્ણુકૃતં ૧ શિવસ્તોત્રમ્

વિષ્ણુરુવાચ ।
ૐ વેદવેદ્યાય દેવાય તસ્મૈ
શુદ્ધપ્રભાચિન્ત્યરૂપાય કસ્મૈ ।
બ્રહ્માદ્યધીશાય સૃષ્ટ્યાદિકર્ત્રે
વિષ્ણુપ્રિયાયાર્તિહન્ત્રેઽન્તકર્ત્રે ॥ ૭૯-૩૨૨॥

નમસ્તેઽખિલાધીશ્વરાયામ્બરાય
નમસ્તે ચરસ્થાવરવ્યાપકાય ।
નમો વેદગુહ્યાય ભક્તપ્રિયાય
નમઃ પાકભોક્ત્રે મખેશાય તુભ્યમ્ ॥ ૭૯-૩૨૩॥

નમસ્તે શિવાયાદિદેવાય કુર્મ
નમો વ્યાલયજ્ઞોપવીતપ્રધર્ત્રે ।
નમસ્તે સુરાબિન્દુવર્ષાપનાય
ત્રયીમૂર્તયે કાલકાલાય નાથ ॥ ૭૯-૩૨૪॥

ધરિત્રીમરુદ્વ્યોમતોયેન્દુવહ્નિ-
પ્રભામણ્ડલાત્માષ્ટધામૂર્તિધર્ત્રે ।
શિવાયાશિવઘ્નાય વીરાય ભૂયા-
ત્સદા નઃ પ્રસન્નો જગન્નાથકેજ્યઃ ॥ ૭૯-૩૨૫॥

કલાનાથભાલાય આત્મા મહાત્મા
મનો હ્યગ્રયાનો નિરૂપ્યો ન વાગ્ભિઃ ।
જગજ્જાડ્યવિધ્વંસનો ભુક્તિમુક્તિ-
પ્રદઃ સ્તાત્પ્રસન્નઃ સદા શુદ્ધકીર્તિઃ ॥ ૭૯-૩૨૬॥

યતઃ સમ્પ્રસૂતં જગજ્જાતમીશા-
ત્સ્થિતં યેન રક્ષાવતા ભાવિતં ચ ।
લયં યાસ્યતે યત્ર વાચાં વિદૂરે

સ વૈ નઃ પ્રસન્નોઽસ્તુ કાલત્રયાત્મા ॥ ૭૯-૩૨૭॥

યદાદિશ્ચ મધ્યં તથાન્તં ન કેઽપિ
વિજાનન્તિ વિજ્ઞા અપિ સ્વાનુમાનાઃ ।
સ વૈ સર્વમૂર્તિઃ સદા નો વિભૂત્યૈ
પ્રસન્નોઽસ્તુ કિં જ્ઞાપયામોઽત્ર કૃત્યમ્ ॥ ૭૯-૩૨૮॥

ઇતિ નારદપુરાણે પૂર્વભાગે એકોનાશીતિતમાધ્યાયાન્તર્ગતં
વિષ્ણુકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

બૃહન્નારદીયપુરાણ । પૂર્વભાગ । અધ્યાય ૭૯/૩૨૨-૩૨૮॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 79/322-328..

Proofread by PSA Easwaran

*Vishnukritam 1 Shiva Stotram*

pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*